# shrI rAhu aShTottarashatanAma stotraM

# શ્રીરાહુ અષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : rAhu aShTottarashatanAma stotraM

File name : rAhu108nAmastotra.itx

Category : aShTottarashatanAma, navagraha, stotra

Location : doc_z_misc_navagraha

Transliterated by : Manda Krishna Srikanth mandaksk at gmail.com

Proofread by : KSR Ramachandran ramachandran_ksr at yahoo.ca, PSA Easwaran

Latest update : November 19, 2012

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીરાહુ અષ્ટોત્તરશતનામસ્તોત્રમ્

રાહુ બીજ મન્ત્ર - ૐ ભ્રાઁ ભ્રીં ભ્રૌં સઃ રાહવે નમઃ ॥

શ◌ૃણુ નામાનિ રાહોશ્ચ સૈંહિકેયો વિધુન્તુદઃ ।
સુરશત્રુસ્તમશ્ચૈવ ફણી ગાર્ગ્યાયણસ્તથા ॥ ૧॥ ફણિર્ગાર્ગ્યાયનસ્તથા
સુરાગુર્નીલજીમૂતસઙ્કાશશ્ચ ચતુર્ભુજઃ । સુરારિર્નીલ
ખડ્ગખેટકધારી ચ વરદાયકહસ્તકઃ ॥ ૨॥

શૂલાયુધો મેઘવર્ણઃ કૃષ્ણધ્વજપતાકાવાન્ । વર્ણો પતાકવાન્
દક્ષિણાશામુખરતઃ તીક્ષ્ણદંષ્ટ્રધરાય ચ ॥ ૩॥ દંષ્ટ્રાકરાલકઃ
શૂર્પાકારાસનસ્થશ્ચ ગોમેદાભરણપ્રિયઃ ।
માષપ્રિયઃ કશ્યપર્ષિનન્દનો ભુજગેશ્વરઃ ॥ ૪॥ કાશ્યપ
ઉલ્કાપાતયિતાશુલી નિધિપઃ કૃષ્ણસર્પરાટ્ । ઉલ્કાપાતજનિઃ શૂલી
વિષજ્વલાવૃતાસ્યોઽર્ધશરીરો જાદ્યસમ્પ્રદઃ ॥ ૫॥ શાત્રવપ્રદઃ
રવીન્દુભીકરશ્છાયાસ્વરૂપી કઠિનાઙ્ગકઃ ।
દ્વિષચ્ચક્રચ્છેદકોઽથ કરાલાસ્યો ભયઙ્કરઃ ॥ ૬॥

ક્રૂરકર્મા તમોરૂપઃ શ્યામાત્મા નીલલોહિતઃ ।
કિરીટી નીલવસનઃ શનિસામન્તવર્ત્મગઃ ॥ ૭॥

ચાણ્ડાલવર્ણોઽથાશ્વ્યર્ક્ષભવો મેષભવસ્તથા ।
શનિવત્ફલદઃ શૂરોઽપસવ્યગતિરેવ ચ ॥ ૮॥

ઉપરાગકરસ્સૂર્યહિમાંશુચ્છવિહારકઃ ।
var ઉપરાગકરસ્સોમ સૂર્યચ્છવિ વિમર્દકઃ
નીલપુષ્પવિહારશ્ચ ગ્રહશ્રેષ્ઠોઽષ્ટમગ્રહઃ ॥ ૯॥

કબન્ધમાત્રદેહશ્ચ યાતુધાનકુલોદ્ભવઃ ।
ગોવિન્દવરપાત્રં ચ દેવજાતિપ્રવિષ્ટકઃ ॥ ૧૦॥

ક્રૂરો ઘોરઃ શનેર્મિત્રં શુક્રમિત્રમગોચરઃ ।

માનેગઙ્ગાસ્નાનદાતા સ્વગૃહે પ્રબલાઢ્યકઃ ॥ ૧૧॥

સદ્ગૃહેઽન્યબલધૃચ્ચતુર્થે માતૃનાશકઃ ।
ચન્દ્રયુક્તે તુ ચણ્ડાલજન્મસૂચક એવ તુ ॥ ૧૨॥

જન્મસિંહે રાજ્યદાતા મહાકાયસ્તથૈવ ચ ।
જન્મકર્તા વિધુરિપુ મત્તકોજ્ઞાનદશ્ચ સઃ ॥ ૧૩॥

જન્મકન્યારાજ્યદાતા જન્મહાનિદ એવ ચ ।
નવમે પિતૃહન્તા ચ પઞ્ચમે શોકદાયકઃ ॥ ૧૪॥

દ્યૂને કળત્રહન્તા ચ સપ્તમે કલહપ્રદઃ ।
ષષ્ઠે તુ વિત્તદાતા ચ ચતુર્થે વૈરદાયકઃ ॥ ૧૫॥

નવમે પાપદાતા ચ દશમે શોકદાયકઃ ।
આદૌ યશઃપ્રદાતા ચ અન્તે વૈરપ્રદાયકઃ ॥ ૧૬॥

કાલાત્મા ગોચરાચારો ધને ચાસ્ય કકુત્પ્રદઃ ।
પઞ્ચમે ધિષણાશૃઙ્ગદઃ સ્વર્ભાનુર્બલી તથા ॥ ૧૭॥

મહાસૌખ્યપ્રદાયી ચ ચન્દ્રવૈરી ચ શાશ્વતઃ ।
સુરશત્રુઃ પાપગ્રહઃ શામ્ભવઃ પૂજ્યકસ્તથા ॥ ૧૮॥

પાટીરપૂરણશ્ચાથ પૈઠીનસકુલોદ્ભવઃ ।
દીર્ઘકૃષ્ણોતનુર્વિષ્ણુનેત્રારિર્દેવદાનવૌ ॥ ૧૯॥

ભક્તરક્ષો રાહુમૂર્તિઃ સર્વાભીષ્ટફલપ્રદઃ ।
એતદ્રાહુગ્રહસ્યોક્તં નામ્નામષ્ટોત્તરં શતમ્ ॥ ૨૦॥

શ્રદ્ધયા યો જપેન્નિત્યં મુચ્યતે સર્વ સઙ્કટાત્ ।
સર્વસમ્પત્કરસ્તસ્ય રાહુરિષ્ટપ્રદાયકઃ ॥ ૨૧॥

॥ ઇતિ રાહુ અષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Provided by Manda Krishna shrikanth mandaksk at gmail.com
Proofread by KSR Ramachandran ramachandran_ksr at yahoo.ca

*shrI rAhu aShTottarashatanAma stotraM*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*